# ॥ सप्तरत्नमालिकास्तोत्रम् ॥

करोपान्ते कान्ते वितरणनितान्ते विदधतीम्
नवां वीणां शोणां नखरुचिभिरेणाङ्कवदनाम् ।
सदा वन्दे मन्देतरमतिरहं देशिकवशात्
कृपालम्बामम्बां कुसुमितकदम्बाङ्गणगृहाम् ॥१ ॥

अपि व्याधावाधावपि सति समाधाय हृदयम्
अनौपम्यां रम्यां श्रुतिसमधिगम्यान्तरकलाम् ।
निजां विद्यामाद्यां नियतमनवद्यां न कलये
न मातङ्गीमङ्गीकृतसरससङ्गीतरसिकाम् ॥२ ॥

शशिप्रख्यं मुख्यं कृतकमलसख्यं तव मुखम्
सुधावासं हासं स्मितरुचिभिरासन्नकुमुदम् ।
कृपापात्रे नेत्रे दुरितकरितोत्रे प्रणमताम्
सदाऽलोके लोकेश्वरि विगतशोकेन मनसा ॥३ ॥

स्फुरद्रूपा नीपावनिरुहसमीपाश्रयपदा
धराधारा धाराधररुचिरुदारारा करुणया ।

स्तुतिप्रीता गीता मुनिभिरुपनीता हितकथाम्
त्रयीसीमा सा मामवतु सुरसामाजिकनुता ॥४ ॥

तुलाकोटीकोटीकिरणपरिपाटीदिनकरम्
नखच्छायामाया शशिनलिनदायादविभवम् ।
पदं सेवे भावे तव विपदभावे व्यवसितम्
जगन्मातः प्रातः कमलमुखि नातः परतरम् ॥५ ॥

सुधां पायं पायं नयनयुगलं घूर्णयति या
ध्रुवं गायं गायं त्रिपुरहरमुच्चैः स्मरति या ।
शुकं वारं वारं करतलगतं चालयति या
स्मरस्मेरे शक्तिप्रणतजनचित्ते वसतु सा ॥६ ॥

न चाह्वानं ध्यानं तदपि न हि ते ह्यासनविधिम्
न चाप्यर्घो न्यासः कति कति च मुद्रार्पणविधिः ।
न मन्त्रो नो यन्त्रं तदपि च न जाने स्तुतिकथाम्
परं जाने मातस्त्वदनुसरणं कष्टहरणम् ॥७ ॥